# सद्गुरु स्तवं

1. सिद्धि बुद्धि महायोग वरणीयो गणाधिपः
यस्स्वयं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

2. यस्य दत्तात्रेय भावो भक्तानामात्म दानतः
सूच्यते सच्चिदानंदं सद्गुरुं तं नमाम्यहं

3. योगाज्योतिस्समुद्दीप्तं जयलक्ष्मी नृसिंहयोः
अद्वयं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

4. योगविद्या चित्रभानुं चित्रभानु शरद्भवं
ज्ञानदं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

5. गणेश होमेर्क दिने नित्यं श्री चक्र पूजने
दीक्षितं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

6. अगस्त्य मुनि संक्रांत नानावैद्य धुरंधरं
भवघ्नं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

7. वाद्योदंचद्दिव्यनाम संकीर्तन कळा निधिं
नादाब्धिं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

8. दत्तपीठाधिपं धर्म रक्षणोपाय बंधुरं
सत्कविं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

9. विधूत भक्त सम्मोहमवधूतं जगद्गुरुं
स्वाश्रयं सच्चिदानंदं सद्गुरुं तं नमाम्यहं

10. साधुत्वं भक्तिमैश्वर्यं दानं योगमरोगतां
सन्मतिं ज्ञानमानंदं सद्गुरु स्तवतो लभेत